શિવસ્તોત્ર સ્વમિ વ્હિવેકનન્દ
ૐ નમઃ શિવાય .
નિખિલભુવનજન્મસ્થમભઙ્ગપ્રરોહાઃ
અકલિતમહિમાનઃ કલ્પિતા યત્ર તસ્મિન્ .
સુવિમલગગનાભે ઈશસંસ્થેઽપ્યનીશે
મમ ભવતુ ભવેઽસ્મિન્ ભાસુરો ભાવબન્ધઃ ..
નિહતનિખિલમોહેઽધીશતા યત્ર રૂઢા
પ્રકટિતપરપ્રેમ્ના યો મહાદેવ સંજ્ઞઃ .
અશિથિલપરિરમ્ભઃ પ્રેમરૂપસ્ય યસ્ય
પ્રણયતિ હૃદિ વિશ્વં વ્યાજમાત્રં વિભુત્વમ્ ..
વહતિ વિપુલવાતઃ પૂર્વ સંસ્કારરૂપઃ
પ્રમથતિ બલવૃંદં ઘૂર્ણિતેવોર્મિમાલા .
પ્રચલતિ ખલુ યુગ્મં યુષ્મદસ્મત્પ્રતીતમ્
અતિવિકલિતરૂપં નૌમિ ચિત્તં શિવસ્થમ્ ..
જનકજનિતભાવો વૃત્તયઃ સંસ્કૃતાશ્ચ
અગણનબહુરૂપા યત્ર એકો યથાર્થઃ .
શમિતવિકૃતવાતે યત્ર નાંતર્બહિશ્ચ
તમહહ હરમૌડે ચિત્તવૃત્તેર્નિરોધમ્ ..
ગલિતતિમિરમાલઃ શુભ્રતેજઃપ્રકાશઃ
ધવલકમલશોભઃ જ્ઞાનપુજાટ્ટહાસઃ .
યમિજનહૃદિગમ્યઃ નિષ્કલં ધ્યાયમાનઃ
પ્રણતમવતુ મં સઃ માનસો રાજહંસઃ ..
દુરિતદલનદક્ષં દક્ષજાદત્તદોષમ્
કલિતકલિકલઙ્કં કમ્રકલ્હારકાંતમ્ .
પરહિતકરણાય પ્રાણવિચ્છેદસૂત્કમ્
નતનયનનિયુક્તં નીલકંઠં નમામઃ ..